श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्रामायणे वाल्मीकीये

# ॥ श्री सङ्क्षेप सुन्दरकाण्डम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सङ्क्षेप सुन्दरकाण्डम् ॥

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ **1.1** ॥

यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः।
गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ॥ **2** ॥

प्रविश्य नगरीं लङ्कां कपिराजहितङ्करः।
चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि ॥ **3** ॥

दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ **4** ॥

प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि।
सर्वमप्यवकाशं स विचचार महाकपिः ॥ **5** ॥

अशोकवनिका चेयं दृश्यते या महाद्रुमा।
इमामभिगमिष्यामि न हीयं विचिता मया ॥ **6** ॥

अशोकवनिकायां तु तस्यां वानरपुङ्गवः।
ततो मलिनसंवीतां राक्षसीभिः समावृताम् ॥ **7** ॥

उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवाऽमलाम् ॥ **8** ॥

तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम्।
तर्कयामास सीतेति कारणैरुपपादिभिः ॥ **9** ॥

अस्या देव्या मनस्तस्मिन् तस्य चास्यां प्रतिष्ठितम्।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति॥ **10**॥

एवं सीतां तदा दृष्ट्वा हृष्टः पवनसंभवः।
जगाम मनसा रामं प्रशशंस च तं प्रभुम्॥ **11**॥

राजा दशरथो नाम रथकुञ्जरवाजिमान्।
तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः॥ **12**॥

रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम्।
तस्य सत्याभिसन्धस्य वृद्धस्य वचनात् पितुः।
सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम्॥ **13**॥

ततस्त्वमर्षापहृता जानकी रावणेन तु।
स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम्।
आससाद वने मित्रं सुग्रीवं नाम वानरम्॥ **14**॥

सुग्रीवेणापि सन्दिष्टा हरयः कामरूपिणः।
दिक्षु सर्वासु तां देवीं विचिन्वन्ति सहस्रशः॥ **15**॥

तस्या हेतोर्विशालाक्ष्याः सागरं वेगवान् प्लुतः।
यथा रूपां यथा वर्णां यथा लक्ष्मीं च निश्चिताम्।
अश्रौषं राघवस्याहं सेयमासादिता मया॥ **16**॥

जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता।
सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम्॥ **17**॥

तामब्रवीन्महातेजा हनूमान् मारुतात्मजः।
अहं रामस्य सन्देशात् देवि दूतस्तवागतः॥ **18**॥

वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत्।
लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः॥ **19** ॥

सा तयोः कुशलं देवी निशंय नरसिंहयोः।
प्रीतिसंहृष्टसर्वाङ्गी हनुमन्तम् अथाब्रवीत्॥ **20** ॥

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे।
एति जीवन्तमानन्दो नरं वर्षशतादपि॥ **21** ॥

भूय एव महातेजा हनुमान् मारुतात्मजः।
अब्रवीत् प्रश्रितं वाक्यं सीताप्रत्ययकारणात्॥ **22** ॥

रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्।
प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना॥ **23** ॥

गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम्।
भर्तारमिव संप्राप्तं जानकी मुदिताऽभवत्॥ **24** ॥

ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम्।
प्रदेयो राघवायेति सीता हनुमते ददौ॥ **25** ॥

ततस्तु हनुमान् वीरो बभञ्ज प्रमदावनम्।
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः॥ **26** ॥

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत्।
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम्।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम्॥ **27** ॥

वेष्टयन्ति स्म लाङ्गूलं जीर्णैः कार्पासकैः पटैः।
तैलेन परिषिच्याथ तेऽग्निं तत्रावपातयन्॥ **28** ॥

दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः।
राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् ॥ 29 ॥

मङ्गलाभिमुखी तस्य सा तदासीन्महाकपेः।
उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ 30 ॥

यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः।
यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥ 31 ॥

हनूमता वेगवता वानरेण महात्मना।
लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ 32 ॥

एवमाश्वास्य वैदेहीं हनूमान् मारुतात्मजः।
गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ 33 ॥

ततः स कपिशार्दूलः स्वामिसन्दर्शनोत्सुकः।
आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥ 34 ॥

निपपात महेन्द्रस्य शिखरे पादपाकुले।
दृष्टा सीतेति विक्रान्तः संक्षेपेण न्यवेदयत् ॥ 35 ॥

प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरस्सराः।
महेन्द्राग्रं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ 36 ॥

निपेतुर्हरिराजस्य समीपे राघवस्य च।
हनुमांश्च महाबाहुः प्रणम्य शिरसा ततः।
नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ 37 ॥

तौ जाताश्वासौ राजपुत्रौ विदित्वा
तच्चाभिज्ञानं राघवाय प्रदाय।

देव्या चाख्यातं सर्वमेवानुपूर्व्यात्
    वाचा संपूर्णं वायुपुत्रः शशंस ॥ **38** ॥

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः।
कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ॥ **39** ॥

अभ्यषिञ्चन् नरव्याघ्रं प्रसन्नेन सुगन्धिना।
सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ **40** ॥

आयुष्यमारोग्यकरं यशस्यं
    सौभ्रातृकं बुद्धिकरं शुभं च।
श्रोतव्यमेतन्नियमेन सद्भिः
    आख्यानमोजस्करं ऋद्धिकामैः ॥ **41** ॥

॥ इति श्री सङ्क्षेप सुन्दरकाण्डं समाप्तम् ॥